## 1. मम प्रियं पुस्तकम्

धर्मक्षेत्रे कुरुक्षेत्रे समवेतानां युयुत्सुकानां कौरवाणां पाण्डवानां च मध्ये भगवता कृष्णेन अर्जुनम् अभिलक्ष्य गीता वाणी श्रीमद्भगवद्गीता इति नाम्ना वर्तते। एषा अष्टादश पर्वसु सहस्रश्लोकेषु महर्षिवेदव्यासेन निबद्धा वर्तते। इयं रचना महाभारतस्य मध्यभागे दीपस्तम्भ इव स्थिता प्रतीयते। गीतायाः माहिम्नः विषये स्फुटम् अभिव्यक्तम् अस्मिन् श्लोके —

गीता सुगीता कर्तव्या किमन्यैः
शास्त्रविस्तरैः। या स्वयं पद्मनाभस्य
मुख - पद्माद्विनिः सृता।

गीतायाः कर्मयोगः

गीताशास्त्रं कर्तव्याद् विमुखस्य मानवस्य कर्तव्ये कर्मणि प्रयोजक वर्तते। अत एव इयं कर्मयोगरहस्यम् इति स्मर्यते। स्वबान्धवान् सम्मुखम् दृष्ट्वा अर्जुनः युद्धाद् विमुखो जातः। सः क्लैव्यं कश्मलम् च आप्तवान्। अर्जुनस्य विषादः जीवन - संग्रामात निवर्तकस्य कस्यापि जनस्य विषादः अस्ति। सः विषादः गीतायाः उपदेशेन भगवतकृपया न नष्टो भवति। गीतायाः अन्ते अर्जुनः एव स्वीकरोति —

नष्टो मोहः स्मृतिर्लब्धा
त्वतप्रसादान्मयाच्युत। स्थितोऽस्मि गतसन्देहः
करिष्ये वचनं तव।

भगवता कृष्णेन गीतासारतया

इदमेव उक्तम् —

असक्तः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय। तथा च —

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भू मा ते सङ्गोऽस्त्वकर्मणि॥

सर्वोपनिषदां सारः

अनासक्तकर्मयोगस्य अयं सिद्धान्तः अप्रतिमः खलु। अत्र एव सर्वोपनिषदां सारः विद्यते। गीता गोभूतानाम् उपनिषदां दुग्धम्ः —

सर्वा उपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।

गीतायां सांख्ययोग - बुद्धियोग - ध्यानयोगं भक्तियोगादीनां ज्ञानं सरलसंस्कृतेन उपलभ्यते।

विश्वभाषु रूपान्तरम्

संसारस्य सर्वासु भाषासु गीतायाः रूपान्तरम् उपलभ्यते। विश्वविदितोऽयं ग्रन्थः भारतीयमनीषिणां प्रकाशस्तम्भः वर्तते। किम्बहुना, यावत्कालं नरः तापत्रयग्रस्तो भविष्यति, तावत्कालं सः श्रीमद्गीताम् आश्रयिष्यति।

Scanned with CamScanner